# निर्विकल्पकप्रत्यक्षे नव्यतममतम्

**पण्डितः वीरनारायणाचार्यः पाण्डुरङ्गी**

कर्णाटकसंस्कृतविश्वविद्यालये बेङ्गलूरुनगर्याम्

प्रत्यक्षं द्विविधं निर्विकल्पकं सविकल्पकं चेति। तत्र नामजात्यादियोजनारहितं वैशिष्ट्यानवगाहि निष्प्रकारकं निर्विकल्पकम् इति मणिकारः।

अत्र प्रमाणतया अनुमानमुपन्यस्तं मणिकारेण "प्राथमिकं गौरिति प्रत्यक्षं ज्ञानं जन्यविशेषणज्ञानजन्यं जन्यविशिष्टज्ञानत्वात् अनुमितिवत्। न च स्मरणं तत्र सम्भवति, तज्जन्मनि तेन गोत्वस्याननुभवात्" इति। तथा चानेनानुमानेन निर्विकल्पकज्ञानसिद्धिरिति मणिकाराशयः।

## दिनकर्यादिरीत्यानिर्विकल्पकनिरूपणम्

अत्र स्फुटतार्थं दिनकर्यादिरीत्या निर्विकल्पकं निरूप्यते। तथाहि-

जात्यादिवैशिष्ट्याविषयकं जाति-व्यक्तिविषयकं प्रत्यक्षमेव निर्विकल्पकम्। तच्च घटत्वादिविशिष्टघटादिज्ञाने हेतुः। विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात्।

ननु विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वे मानाभावः। चक्षुःसंयोगद्वितीयक्षण एव घट इति विशिष्टप्रत्यक्षोपगमे क्षतिविरहात्। नहि तृतीयक्षण एव तादृशप्रत्यक्षमिति लोकानामनुभवः। क्षणस्यातिसूक्ष्मत्वेन क्षणविलम्बस्य शपथनिर्णयत्वात्। रक्तो दण्ड इति निर्णयं विना रक्तदण्डवानिति निर्णयानुदयेन अन्वयव्यतिरेकाभ्यां भवतु विशिष्टवैशिष्ट्यप्रत्यक्षे विशेषणतावच्छेदकप्रकारकनिश्चयस्य कारणत्वं, निर्विकल्पकस्य तु अतीन्द्रियत्वेन विशेषणज्ञानहेतुतायामन्वयव्यतिरेकप्रत्यक्षासंभवादिति चेत्

अत्रोच्यते। चक्षुःसंयोगाद्यनन्तरमेव घट इत्याकारकं घटत्वविशिष्टविषयकं ज्ञानं न संभवति, पूर्वं विशेषणस्य घटत्वादेर्ज्ञानाभावात्, **विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात्**। कदाचिद्धट इत्याकारकं स्वरूपतोघटत्वप्रकारकं, कदाचिज्जातिमानिति जातित्वेन घटत्वप्रकारकं ज्ञानं जायते इत्यनुभवसाक्षिकम्। तन्निर्वाहाय घटत्वांशेऽन्याप्रकारकघटत्वप्रकारकबुद्धौ तादृशघटत्वज्ञानत्वेन, घटत्वांशे जातित्वप्रकारकघटत्वविशिष्टबुद्धौ च तादृशघटत्वनिश्चयत्वेन हेतुत्वस्यावश्यकत्वात्। अन्यथा जातिमानिति घटत्वप्रकारकबोधोत्पादसामग्रीस्थलेपि घट इत्याकारकप्रत्यक्षापत्तेः। तथाच प्रथमतः घटघटत्वयोर्वैशिष्ट्यानवगाहि यत् घटत्वज्ञानं जायते तदेव निर्विकल्पकम्।

घटघटत्वयोर्वैशिष्ट्यानवगाहि इत्यस्य **वैशिष्ट्यनिष्ठसांसर्गिकविषयतानिरूपितविषयिता-शून्यमित्यर्थः**। वैशिष्ट्यीयसांसर्गिकविषयितानिरासेनैव घटघटत्वनिरूपितविशेष्यिताप्रकारिताशून्यत्वं

लब्धं, तयोर्वैशिष्ट्यीयसांसर्गिकविषयितानियतत्वात्। नचैवं निर्विकल्पकस्य निर्विषयकत्वापत्तिः, तुरीयविषयिताया एव स्वीकारात्। **तथा च संसर्गिताशून्यत्वं वा, प्रकारिताशून्यत्वं वा, विशेष्यिताशून्यत्वम् वा, तुरीयविषयितावत्त्वं वा निर्विकल्पकलक्षणम्। इति दिनकर्यादिषु तत्स्वरूपं निरूपितम्।**

**निर्विकल्पकस्य नव्योक्तस्वरूपनिराकरणम्**

तदेतन्नव्यमतं सर्वमेवापातरमणीयम्। कस्येदं निर्विकल्पकं प्रत्यक्षं भवति- इदानीमुत्पन्नानां शिशूनां तदितरेषामपि वृद्धानां वा। बालादेरपि प्राथमिकं मात्रादिज्ञानं तावत् सविकल्पकमेव स्यात्, तत्र मात्रादिशब्दज्ञानाभावेपि मात्राद्याकृत्या पर्याप्तसंनिकर्षादिसत्त्वेन मात्रादिपरिमाणस्य अवयवसंस्थानविशेषस्य मात्राकृतौ शुक्लत्वनीलत्वादीनां तत्तच्छब्दवाच्यत्वमुखेनाज्ञानेपि वस्तुत्वादिना तज्ज्ञानमस्त्येव। सोपि खलु मातृपित्रादीन् भिन्नाकृतीन् परस्परं भिन्नानेव जानीते, प्रत्यभिजानीते च। तदीयशरीरादौ ह्रस्वत्व-दीर्घत्व-अणुत्व-महत्त्वादिकं, स्तन्यादौ च मधुरत्वादिकं जानात्येव। यदि तत्र भेददर्शनं न स्यात् तर्हि मातृस्पर्शादेव सुखं, नान्यस्पर्शात् इत्यनुपपन्नं स्यात्, मात्रादिषु परस्परभेदाज्ञानेन सर्वासां स्त्रीणां समानत्वात्। एवं च शिशोरपि तत्तच्छब्दवाच्यत्वाज्ञानेपि तत्तत्परिमाणभेदेन घटपटयोर्भेदः ज्ञात एव। तस्मान्न शिशोः निर्विकल्पकम्।

नापि बालादिवृद्धान्तानाम्, ऐदंप्राथम्येनैव देवदत्तादिदर्शनेपि तदीयविलक्षण-गुणजात्यादिविशिष्टस्यैव दर्शनावश्यंभावात्। न हि तदा तत्र वस्तुत्व-द्रव्यत्व-मनुष्यत्वादिकमपि न भासते, अनुभवविरुद्धत्वात्। देवदत्तादिशब्दवाच्यत्वज्ञानाभावेपि खलु पुरुषत्वादिना तद्दर्शनस्यावश्यकत्वात्। अदृष्टाश्रुतपूर्वस्य कस्यचित् वस्तुनः पुरस्स्थितौ तद्वाचकशब्दाज्ञानेपि वस्तुत्वेन द्रव्यत्वेन वा तद्वाचकशब्दः, तस्य परिमाणादिभेदाः इत्यादयस्तावद्गृह्यन्ते एव। अत एव प्रकारिताशून्यत्वं विशेष्यिताशून्यत्वमित्यादिलक्षणानि स्वत एव निराकृतानि वेदितव्यानि।

**उक्तं च न्यायमञ्जरीकृता**

“तस्माद् य एव वस्त्वात्मा सविकल्पस्य गोचरः।
स एव निर्विकल्पस्य शब्दोल्लेखविवर्जितः।।
किमात्मकोऽसाविति चेद् यद्यदा प्रतिभासते।
वस्तुप्रमितयश्चैव प्रष्टव्या न तु वादिनः।।
क्वचिज्जातिः क्वचिद् द्रव्यं क्वचित् कर्म क्वचिद् गुणः।

यदेव सविकल्पेन तदेवानेन गृह्यते।।

इदं शब्दानुसन्धानमात्रमभ्यधिकं परम्।

विषये न तु भेदोऽस्ति सविकल्पाविकल्पयोः।।

अतः शब्दानुसन्धानवन्ध्यं तदनुबन्धि वा।

जात्यादिविषयग्राहि सर्वं प्रत्यक्षमिष्यते''।।(न्या.मं.आ.2.पृ. 256-7)

अत एवोक्तं भट्टकुमारिलेनापि प्रत्यक्षसूत्रे

''अस्ति ह्यालोचनाज्ञानं प्रथमं निर्विकल्पकम्।

बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम्।।

न विशेषो न सामान्यं तदानीमनुभूयते।

तयोराधारभूता तु व्यक्तिरेवावसीयते।।

निर्विकल्पकबोधेपि द्व्यात्मकस्यापि वस्तुनः। ग्रहणम्'' इति। (श्लो.वा.प्र.112-3, 118)

तस्मात् यत्किंचिदपि प्रत्यक्षज्ञानमुत्पद्यते तत्सर्वं प्रथमतो निर्विकल्पकमेव बालमूकादीनामिव। शनैः शनैश्च तत्तद्वाचकशब्दानां ज्ञानेन शब्दानुविद्धा एवार्थाः प्रतीयन्ते। तत्र च सविकल्पके इन्द्रियसंनिकर्षवत् वाचकत्वादिसंस्कारोपि कारणम्। तथा च यदेव शब्दादिसंस्कारशून्यानां बालादीनामिव ज्ञानमुत्पद्यते तदेव निर्विकल्पकम्, शब्दाविषयकत्वात्। न तु तुरीयविषयतावत्त्वात्, तुरीयविषयतायाः अप्रामाणिकत्वात्[1]। शब्दादिवाचकताज्ञानसहकारेण च यज्ज्ञानमुत्पद्यते तदेव सविकल्पकम्, शब्दविषयकत्वात् इत्येतदेवास्य तत्त्वम्। न तु सर्वत्र घटत्वज्ञानपूर्वकं घटादिज्ञानमिति नव्योक्तः क्रमः।

## तात्पर्यटीकादिप्राचीनग्रन्थरीत्या निर्विकल्पकनिरूपणम्

किंच भाष्यवार्तिकतात्पर्यटीकादिविरुद्धमिदं निर्विकल्पकनिरूपणम्। तथाहि तात्पर्यटीकायामेव प्रथमवारं निर्विकल्पकनिरूपणं दृश्यते[2]। तत्र चादृतं क्रममविगणय्यैव मणिकारादिभिः स्वेच्छया निर्विकल्पकं निरूपितम्।

---

[1] वक्ष्यते चैतदुपरिष्टात्।

[2] तदेतदतिस्फुटत्वात् शिष्यैर्गम्यत एवेति भाष्यवार्तिककाराभ्याम् अव्याख्यातमपि अस्माभिः त्रिलोचनगुरून्नीतमार्गानुगमनोन्मुखैः। यथान्यायं यथावस्तु व्याख्यातमिदमीदृशम्।। (ता.टी.226)

तथा हि **तात्पर्यटीकावाक्यान्युदाह्रियन्ते** - इह द्वयी प्रत्यक्षजातिरविकल्पिका सविकल्पिका चेति। तत्रोभय्यपि इन्द्रियार्थसंनिकर्षोत्पन्नमिति लक्षणेन संगृहीतापि स्वशब्देनोपात्ता, तत्र विप्रतिपत्तेः। तत्राविकल्पिकायाः पदम् **अव्यपदेश्यमिति**, सविकल्पिकायाश्च **व्यवसायात्मकमिति**। तत्र व्यपदेशो विशेषणमुपलक्षणं वा नामजात्यादि, तत्कर्म व्यपदेश्यं विशेष्यमिति यावत्। तद्यथा डित्थोयं गौरयं शुक्लोयं कमण्डलुमानयं गच्छत्ययमिति सर्वं हि सविकल्पकं विशेषणविशेष्यभावेन वस्तुषु प्रवर्तते। अविद्यमानं व्यपदेश्यं यस्मिंस्तदव्यपदेश्यं जात्यादिस्वरूपावगाहि, न तु जात्यादीनां मिथो विशेषणविशेष्यभावावगाहीति यावत्।

तत्र नामरहितमविकल्पकं नास्तीति ये विप्रतिपद्यन्ते तन्मतमपाचिकीर्षुरुपन्यस्यति भाष्यकारः- यावदर्थं वै नामधेयशब्दाः। (ता.टी. पृ. 220)

यत्तु शब्दानुपायेपि ज्ञाने शब्दः पूर्वं भवति तत् गृहीतसंकेतस्य प्रथममिन्द्रियार्थ-संनिकर्षादालोचनेन शब्दसंसर्गरहितेनालोचिते अर्थमात्रे तस्यार्थभेदस्य शब्दभेदेन संबन्धात् शब्दविषयः संस्कारः प्रबोध्यते। प्रबुद्धः शब्दस्मृतिं जनयति। तेन व्युत्पन्नस्य निर्विकल्पकात् पराञ्चः प्रत्ययाः शब्दानुपाया अपि शब्दपुरस्सरा जायन्ते।.... तस्मात् व्युत्पन्नस्यापि नामधेयस्मरणाय पूर्वमेषितव्यो विनैव नामधेयमर्थप्रत्ययः। तदिदमुक्तम्-....**यदा तु सोर्थो गृह्यते** नामधेयरहितो नामधेयस्मरणात् प्राक् पूर्वमविकल्पेन (ता.टी. पृ.222-3)

तस्मत् अविकल्पकप्रत्यक्षावरोधार्थेनाव्यपदेश्यपदेनास्यैवाविकल्पकस्य शब्दानुव्याधरहितता सूचिता (ता.टी. पृ.223)

प्रथममालोचितोर्थः सामान्यविशेषवान् संकेतग्रहणसमयवर्तिनीमात्मनोवस्थां स्मारयन् तत्कालभाविनं शब्दमपि स्मारयत्यवर्जनीयतया। (ता.टी. पृ.229)

स खलु इन्द्रियार्थसंनिकर्षात् जातिमन्तं संमुग्धमर्थम् आलोच्य उद्बुद्धसंस्कारसमुपजात-पूर्वपिण्डानुस्मृतिसहायः प्रागेव चक्षुषा विकल्पयति गौरयमिति। .... अर्थौ हि रूपरूपिभावेन स्थितावपि नापातजन्मना ज्ञानेन तथा गृहीतौ, अपि तु स्वरूपमात्रेण। न हि यावदस्ति तावत् ग्रहीतव्यं, तेन तदेकदेशग्रहेपि नाप्रमाणता्। सविकल्पकं तु उक्तसामग्रीजन्म जात्यादि रूपतया, द्रव्यं च रूपितया कल्पयत् पश्चाज्जायमानमपि इन्द्रियार्थसंनिकर्षप्रभवतया प्रमाणं भवत्येव। (ता.टी. पृ.233-4)।

**न्यायभूषणेपि** तथैव निरूपितं निर्विकल्पकम्। तथा हि तद्वाक्यं- तत्र संज्ञादिसंबन्धोल्लेखेन ज्ञानोत्पत्तिनिमित्तं सविकल्पकं प्रत्यक्षम् (न्या.भू. पृ.173)। प्रथमाक्षिसंनिपातजं हि ज्ञानं समयस्मरणविशेषणग्रहणनिरपेक्षमुत्पन्नं तेन तत् निर्विकल्पकम्। (न्या.भू. पृ.176)।

**न्यायलीलावत्यां** च तथैव निरूपितं निर्विकल्पकम्। तथा हि तद्वाक्यं- शब्दादिसंयोजनारहितम् अविकल्पकम्। (न्या.ली.पृ.481)। **शब्दादीति**। आदिपदाज्जात्यादिसंग्रहः। **संयोजना** वैशिष्ट्यम्। निर्विकल्पकानन्तरं स्मृतवाचकशब्दवैशिष्ट्यं सविकल्पकस्य विषयः, न तु निर्विकल्पकस्य। तेन वैशिष्ट्याविषयकं ज्ञानं निर्विकल्पकमित्यर्थः इति न्यायलीलावतीप्रकाशः। (न्या.ली.प्र.पृ.481)।

### तात्पर्यटीकादिप्राचीनग्रन्थविरुद्धं मण्युक्तनिर्विकल्पकम्

तथा च पूर्वोदाहृतवाक्यैः शब्दवाच्यत्वानवगाहि प्राथमिकं ज्ञानमेव निर्विकल्पकमिति स्पष्टं प्रतीयते। तथा च टीकाकारोक्तनिर्विकल्पकविरुद्धं मणिकारीयनिर्विकल्पकम्। "तथा च प्रथममालोचितोर्थः सामान्यविशेषवान् संकेतग्रहणसमयवर्तिनीमात्मनोवस्थां स्मारयन् तत्कालभाविनं शब्दमपि स्मारयत्यवर्जनीयतया" इति ग्रन्थेन (ता.टी. 229) आलोचनात्मके निर्विकल्पके सामान्यविशेषवान् अर्थः विषयो भूत्वा संकेतग्रहणावस्थासमयवर्तिनीमात्मनोवस्थां स्मारयति इत्युक्तत्वात्, तादृशवस्तुगतपरिमाणादेः निर्विकल्पकाविषयत्वे संकेतग्रहणावस्थास्मारकत्वासंभवात्।

"प्राथमिकं गौरिति प्रत्यक्षं ज्ञानं जन्यविशेषणज्ञानजन्यं जन्यविशिष्टज्ञानत्वात् अनुमितिवत्" इति मणिकारेण विशेषणज्ञानार्थं निर्विकल्पकमिष्टम्। न च तत्संमतं टीकाकर्तुः, प्रथमं संस्कारोद्बोधाद्यभावात् जात्यादिविशिष्टं संमुग्धतया अवगाहयत्, न तु जातित्वेन व्यक्तित्वेन वा अवगाहयत् निर्विकल्पकमित्युक्तत्वात् टीकाकृता।

### मणिकारमतस्यायुक्तत्वम्

किंच विशेषणज्ञानं निर्विकल्पकरूपं कीदृशम्? गोत्वमिति वा, यत्किंचिदिति वा, विशेषणमिदमिति वा। नाद्यः। निर्विकल्पके टीकाकृदुक्तरीत्या गोत्वत्वादिना स्वरूपतो वा व्यक्तिविवेकेन गोत्वादिभानाभावात्, इदं गोत्वमिति गोत्वशब्दवाच्यत्वाभानाच्च। न द्वितीयः, अनुपयोगात् अतिप्रसङ्गाच्च। न तृतीयः, असिद्धेः। न हि निर्विकल्पके किमपि विशेषणतया विशेष्यतया वा भासते। अथ गोत्वमिदम् इति भानाभावेपि गोसंनिकर्षे गोत्वस्यापि भानेन यत्किंचिदिदमिति ज्ञानेनैव कृतार्था वयमिति चेत् तर्हि सर्वमिति ज्ञानेपि गोत्वादेर्भानेन निर्विकल्पकासिद्धावपि अनुमानस्यास्य अर्थान्तरताप्रसङ्गः। सर्वस्यापि पुरुषस्याबालस्य प्रसिद्धमिदं सर्वमिति ज्ञानम्।

## निर्विकल्पके जातिभानविचारः

किंच निर्विकल्पके जातिर्भासते न वा इति विचार्यम्। तदर्थं जातिभानस्वरूपं किमिति च विचार्यम्। गां गोत्वेन गोशब्दवाच्यत्वेन अजानतः पुरुषस्य गवा सह चक्षुषः संनिकर्षे सति गोः स्वरूपं, तद्गतविषाणित्वादेः, सर्वगोषु विषाणित्वादेः सादृश्यस्य, गोगतस्य धर्मविशेषस्य च ज्ञानं जायते एव। परन्तु सः धर्मः गोत्वमिति तेन न ज्ञायते। गोत्वमिदम् इत्याकारकज्ञाने गोशब्दवाच्यत्वस्यापि आवश्यकत्वात्। कश्चन धर्मोयम् इति ज्ञानं तु नोपयोगि। "एकद्विबहुष्वात्मस्वरूपानुगमप्रत्ययकारि स्वरूपाभेदेन आधारेषु वर्तमानमनुवृत्तिप्रत्ययकारणम्। कथम्? प्रतिपिण्डं सामान्यापेक्षं प्रबन्धेन ज्ञानोत्पत्तौ अभ्यासप्रत्ययजनिताच्च संस्कारादतीतज्ञानप्रबन्धप्रत्यवेक्षणात् यदनुगतमस्ति तत्सामान्यमिति" इति प्रशस्तपादग्रन्थेन अनुवृत्तिप्रत्ययकारणतया यदनुभूयते तदेव सामान्यमिति ज्ञायते। "एतत्सदृशो मया प्रागुपलब्ध इत्येवं स्मरणात्समनुगतं यदस्तीति ज्ञायते तत्सामान्यमिति" इति व्योमवतीव्याख्यानम् (पृ.687)। तथा च सामान्यस्य प्रतीतिः अनुगततयैव भवति। अनुगतत्वेन प्रतीतिर्नास्तीति चेत् सामान्यस्य प्रतीतिर्न, किन्तु विशेषस्यैव[3] इति सिध्यति।

तथा च निर्विकल्पके जातिर्न भासते इत्येव सिद्धे जातिरूपविशेषणज्ञानाभावात् विशिष्टज्ञानस्याप्यनुदय एव। तथा च भग्नमनुमानं मणिकारस्य।

"(एतज्जन्मनि) प्राथमिकं गौरिति प्रत्यक्षं ज्ञानं जन्यविशेषणज्ञानजन्यं जन्यविशिष्टज्ञानत्वात्" इति मणिकृतोनुमानम्। तन्न युक्तम्। गौरिति प्रत्यक्षात् प्राक् अनुगतस्य गोत्वस्याज्ञानेन गौरिति जातिविशिष्टस्य भानासंभवात्। किन्तु प्रथमतः गवादिना संनिकर्षे तत्र गोत्वरूपविशेषधर्मस्य स्वरूपमात्रेण दर्शने, ततश्च अपरानपि गोव्यक्तिविशेषान् भूयो भूयः दृष्ट्वा तान् गोशब्दवाच्यान् विज्ञाय ततः परमेव गौरयम् गौरयम् गौरयम् इति खलु प्रत्यभिजानीते व्युत्पित्सुः।

## मणिकारलक्षणस्य अस्मदनुकूलत्वनिरूपणम्

किंच नामजात्यादियोजनारहितं निर्विकल्पकमित्येव मणिकृता लक्षणमुक्तम्। तत्र निर्विकल्पके नाम शब्दापरपर्यायं न भासते इति तु तेनाप्यङ्गीकृतम्। जातिरपि न भासते एव, अनुगततया अभासमानत्वात्। तथा च मणिकारेणापि वस्तुतः अस्मदुक्तमेव स्वीकृतमिति तु व्यक्तम्।

---

[3] अपरं द्रव्यत्वगुणत्वकर्मत्वादि अनुवृत्तिव्यावृत्तिहेतुत्वात् सामान्यं विशेषश्च भवति। (प्रशस्तपादभाष्यम्) प्रशस्तमतेहि यदा द्रव्यत्वमनुवृत्तिप्रत्ययहेतुः तदा सामान्यं, व्यावृत्तिप्रत्ययहेतुत्वे तु विशेष एव।

**तुरीयविषयिताविचारः**

किंच निर्विकल्पके तुरीयविषयता केति निरूपणीयम्। विषयिताया अनिरूपणे च निर्विषयकस्य ज्ञानत्वभङ्गः। केवलं तुरीयेति वचनमात्रेण न कृतार्थता।

**विशेषणज्ञानस्य विशिष्टज्ञानकारणत्वविमर्शः**

"अगृहीतदण्डस्य हि दण्डी पुरुष इति प्रत्ययानुदयदर्शनेन अन्वयव्यतिरेकाभ्यामेव विशेषणज्ञानस्य विशिष्टज्ञानकारणत्वावधारणात्" इति **न्यायसिद्धान्तदीपकारेण** निर्विकल्पकज्ञानस्य सविकल्पकज्ञानहेतुत्वे प्रमाणमुपदर्शितम्। तन्न। ऐदंप्राथम्येन दण्डेन सह संनिकर्षे संनिकर्षबलात् दण्डस्य ज्ञानमुत्पद्यते एव। परन्तु दण्डोयमिति दण्डशब्दवाच्यत्वं न जानाति पुरुषः। तदा च किमपीदं वस्तु इत्येव जानाति। तद्वदेव दण्डविशिष्टदेवदत्तेन सह संनिकर्षे सति किंचिद्विशिष्टो देवदत्त इति ज्ञात्वा ततश्च व्युत्पादकेन दण्डोयमित्युपदेशे शब्दवाच्यत्वमात्रविषयकं दण्डी देवदत्त इति ज्ञानं भवत्येव। तत्र दण्डदेवदत्तयोः स्वरूपतः पूर्वमेव ज्ञातत्वेन शब्दवाच्यत्वमात्रस्याधिकस्य भानात्। यथा वा ऐदंप्राथम्येन पुरुषविशेषेण संनिकर्षे सति देवदत्तादिशब्दवाच्यत्वेन तस्य ज्ञानाभावेपि पुरुषोयमिति ज्ञायते एव। तद्वदेव दण्डिनोपि देवदत्तस्य ज्ञानं स्वरूपतो भवत्येव। यत् ज्ञानं न भवति तत्तु शब्दवाच्यत्वविषयकमस्मदुक्तमेव। तच्चास्माकं निर्विकल्पकमेव न तु युष्माकं निर्विकल्पकम्।

तथा च विशेषणज्ञानस्य विशिष्टज्ञानकारणत्वे नास्त्येव प्रमाणम्।

**विशिष्टवैशिष्ट्यज्ञानं विशेषणतावच्छेदकप्रकारकज्ञानस्य कारणत्वविमर्शः**

एवमेव चक्षुरादिसंनिकर्षमात्रेणैव विशिष्टवैशिष्ट्यज्ञानोत्पत्तौ बाधकाभावेन न तत्र विशेषणतावच्छेदकप्रकारकज्ञानस्य कारणत्वम्। शब्दवाच्यत्वप्रतीतिस्तु स्यान्न स्याद्वा। न तेन भवदभिमतनिर्विकल्पकसिद्धिरित्युक्तमेव।

**निर्विकल्पके केषां भानमिति विचारः**

निर्विकल्पके जातिमात्रं वा जातिव्यक्ती वा जातिव्यक्तिसमवाया वा इत्यत्रापि नव्यमते विप्रतिपत्तिरेव। संप्रदायमते समवायभानाभावेपि वस्तुतस्तुमते समवायभानात्[4]। समवायाभावयोर्निर्विकल्पकविषये विप्रतिपत्तेः।

---

[4] वस्तुतस्तु निर्विकल्पकेपि समवायभानमस्त्येव। न्यायकौस्तुभे पृ.195. एवमभावेपि प्रथममभावविशेष्यक एव प्रत्ययो जायते, अनन्तरं तेन तद्विशेषणकप्रत्ययो जन्यते इति। संयोगज्ञानादौ पुनरवच्छेदकग्रहध्रौव्येपि संयोगत्वज्ञानत्वनिर्विकल्पकविलम्बेन तद्विशिष्टप्रत्ययविलम्बः। तथा च न तस्य सविकल्पकैकवेद्यता। अन्येतु

किंच दण्डीतिविशिष्टज्ञानस्य विशेषणज्ञानजन्यत्वेन दण्डादेरपि निर्विकल्पकं स्वीक्रियते न वा। न द्वितीयः। एतज्जन्मीयप्राथमिकदण्डीतिज्ञानकारणतया तस्याप्यावश्यकत्वात्। नाद्यः। दण्डस्य कथं च दण्डनिर्विकल्पकम्।

**निर्विकल्पकानङ्गीकारे बाधकाभावः**

"कदाचिद्घट इत्याकारकं स्वरूपतोघटत्वप्रकारकं, कदाचिज्जातिमानिति जातित्वेन घटत्वप्रकारकं ज्ञानं जायते इत्यनुभवसाक्षिकम्। तन्निर्वाहाय घटत्वांशेऽन्याप्रकारकघटत्वप्रकारकबुद्धौ तादृशघटत्वज्ञानत्वेन, घटत्वांशे जातित्वप्रकारकघटत्वविशिष्टबुद्धौ च तादृशघटत्वनिश्चयत्वेन हेतुत्वस्यावश्यकत्वात्। अन्यथा जातिमानिति घटत्वप्रकारकबोधोत्पादसामग्रीस्थलेपि घट इत्याकारकप्रत्यक्षापत्तेः। तथाच प्रथमतः घटघटत्वयोर्वैशिष्ट्यानवगाहि यत् घटत्वज्ञानं जायते तदेव निर्विकल्पकम्"। इति मणि-कौस्तुभादीनामाशयः। सोपि न समीचीनः। घटत्वस्य जातिशब्दवाच्यत्वज्ञाने सति, जातित्वेन घटत्वज्ञानेच्छायां च सत्यामेव जातिमान् इति, घटस्य जातिशब्दवाच्यत्वज्ञानाभावे, जातित्वेन घटत्वज्ञानेच्छायां चासत्यां घटत्ववान् इति ज्ञानसंभवात्।

घटत्वस्य घटत्वशब्दवाच्यत्वज्ञाने सत्येव घटत्ववान् इति ज्ञानम्, तदसत्त्वे सामान्यतः जातिशब्दवाच्यत्वज्ञाने च सति जातिमान् इति ज्ञानमुत्पद्यते इति वा तयोर्भेदोपपादनसंभवात्।

**निर्विकल्पकनिराकरणाभिप्रायः**

"निर्विकल्पकसविकल्पकभेदेन च द्विविधं प्रत्यक्षमित्याचक्षते। तत्र **वस्तुस्वरूपमात्रावभासकं निर्विकल्पकम्**। विशिष्टाकारगोचरं सविकल्पकम्। तत् अष्टविधम्[5]। तत्र द्रव्यविकल्पो यथा दण्डीति। गुणविकल्पो यथा शुक्ल इति। क्रियाविकल्पो यथा गच्छतीति। जातिविकल्पो यथा गौरिति। विशेषविकल्पो यथा विशिष्टः परमाणुरिति। समवायविकल्पो यथा पटसमवायवन्तस्तन्तव इति। नामविकल्पो यथा देवदत्त इति। अभावविकल्पो यथा घटाभाववद्भूतलमिति। **एतदप्यसत्**। विशेषसमवाययोरप्रामाणिकत्वात्। नाम्नः पश्चात्स्मरणेनाभावस्य च प्रतियोगिस्मरणाधीनज्ञानत्वेन तद्विकल्पस्य प्रथमाक्षिसंनिकर्षानन्तरमेवोत्पत्त्यभावेपि द्रव्यादिविकल्पानां प्रथममेवोत्पत्तौ बाधकाभावेन

---

संयोगज्ञानादेरपि सविकल्पकैकवेद्यतैव।.. अपरे अध्रौव्ये सिद्धसाधनात् इत्यत्रैव भरं कुर्वाणाः समवायादेरपि निर्विकल्पकविषयत्वमाहुः। अत एव निर्विकल्पकविषयत्वमेवार्थस्य लक्षणं स्वीचक्रिरे। न्या.सि.दी. 47-48.

[5] न्यायग्रन्थेषु कुत्रोक्तमिति द्रष्टव्यम्।

निर्विकल्पकानुपपत्तेः"[6] जयतीर्थ-व्यासतीर्थादिभिः निर्विकल्पकनिराकरणं तु मण्याद्यभिमतयथाश्रुतनिर्विकल्पकाभिप्रायेण।

### आधुनिकमतम्

आधुनिकास्तु सेकेण्डाख्ये कालांशे चतुर्थो योंशः तन्न्यूनकालिकसंनिकर्षेण यत् ज्ञानमुत्पद्यते तदेव निर्विकल्पकमित्याहुः। तत्र संनिकर्षस्याल्पकालिकत्वात् झटिति अतिसूक्ष्मकाले संनिकर्षस्य अपगमाच्च चक्षुर्न सुस्पष्टं ज्ञानं जनयितुमीष्टे। तदा च किमपि इत्येव वस्तु प्रतीयते। द्रव्यं पुरुषः घटः इत्यादिरीत्या तु न ज्ञायते। शुक्लं कृष्णं उच्चं नीचं महत् ह्रस्वमिति वा तावदेव ज्ञायते। पूर्वोक्ताधिके कालांशे ततोधिके वा काले चक्षुस्संनिकर्षे तु तस्य वस्तुनः बहवोंशाः गृह्यन्ते इति तस्य सविकल्पकता।

### निष्कर्षः

तथा चेदं सिद्धं यत् शब्दवाच्यत्वाद्यनवगाह्येव ज्ञानं निर्विकल्पकमिति प्राच्यनैयायिकैरभिहितम्। मीमांसकैरपि तदेवानुमोदितम्। वैयाकरणास्तु नाङ्गीकुर्वन्त्येतादृशं निर्विकल्पकम्, सर्वत्र ज्ञानेषु शब्दभानाङ्गीकारात्। परन्तु वस्त्वादिसामान्यशब्दवाच्यत्वाद्यवगाहित्वेपि घटपटादिविशेषशब्दावगाहित्वाभावात् निर्विकल्पकता प्राच्यनैयायिकाभिमता। शशधरमारभ्य मणिकारादयस्तु वैशिष्ट्यानवगाहीति नूतनमेव निर्विकल्पकस्वरूपमाभाषयन्ति। तच्च पूर्वसूरिविरुद्धम्, अनुभवानारूढं चेति सप्रसङ्गं निरूपितम्।

## उपयुक्तग्रन्थसूची

**तत्त्वचिन्तामणिः** श्रीमद्गङ्गेशोपाध्यायविरचितः, प्रत्यक्षखण्डः मथुरानाथकृतरहस्य-जयदेवकृतालोकटीकासहितः (प्रथमभागः), अनुमित्यादिबाधान्तम् अनुमानखण्डः, मथुरानाथकृतरहस्यनामकटीकासहितम् (द्वितीयो भागः प्रथम परिच्छेदः), शब्दखण्डमारभ्य उच्छन्नप्रच्छन्नवादपर्यन्तम्, मथुरानाथकृतरहस्य-जयदेवमिश्रकृतालोकटीकासहितः (चतुर्थो भागः प्रथमपरिच्छेदः), विधिवादादिप्रमाणचतुष्टयप्रामाण्यवादान्तं शब्दखण्डः, मथुरानाथकृतरहस्य-

[6] प्रमाणपद्धतौ प्रत्यक्षपरिच्छेदान्ते।

जयदेवमिश्रकृतालोकटीकाभ्यां रघुनाथशिरोमणिकृतेन आख्यातवादेन नञ्वादेन च सहितः (चतुर्थो भागः द्वितीयः परिच्छेदः), परिशोधकः संपादकश्च कामाख्यानाथः, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली,1990.

( 1901-1884वर्षीयस्य एशियाटिक्सौसिटीसंस्करणस्य मुद्रणप्रतिकृतिः)

**कारिकावली** (मुक्तावलीसहिता) श्रीविश्वनाथतर्कपञ्चाननकृता, प्रभा-मञ्जूषा-दिनकरी-रामरुद्री-गङ्गारामीव्याख्याभिः समन्विता, सम्पादकः श्री सी. शंकररामशास्त्री, (व्रजजीवनप्राच्यभारतीग्रन्थमाला सं0 29) चौखम्बासंस्कृतप्रतिष्ठान, दिल्ली, 1988. (बालमनोरमाग्रन्थावली सं0 6, 1923, संस्करणस्य मुद्रणप्रतिकृतिः).

**तर्कताण्डवम्** व्यासतीर्थकृतम् राघवेन्द्रतीर्थकृतन्यायदीपव्याख्यासहितम्, सं.डी.श्रीनिवासाचार्य-वी. मध्वाचार्यौ, (चतुर्षु भागेषु) ओरियण्टल् रिसर्च् इन्स्टिट्यूट्, ग्रन्थमालासंख्या 74,77,79,82, मैसूरु, 1932,35,38,.43.

न्यायकौस्तुभः सं.उमेशमिश्रः, सरस्वतीभवनग्रन्थमाला 33, वाराणसी, 1930.

**न्यायमञ्जरी** जयन्तभट्टकृता, संपादककृतन्यायसौरभव्याख्यासहिता, संपा. के. एस्. वरदाचार्यः, (प्राच्यविद्यासंशोधनालयग्रन्थमाला सं0 116, 139) मैसूरु, 1970, 83.

**न्यायदर्शनम्** गोतमकृतम्, (प्रथमो भागः) वात्स्यायनकृतभाष्य-उद्द्योतकरकृतवार्त्तिक-वाचस्पतिमिश्रकृतटीका-उदयनकृतपरिशुद्धिसहितम् (प्रथमाध्यायः), संपा. अनन्तलालठक्कुरः, मिथिलासंस्कृतविद्यापीठम्, दर्भाङ्गा, 1967.

**न्यायभूषणम्** भासर्वज्ञकृतम्, स्वोपज्ञन्यायसारव्याख्यानम्, संपा. स्वामी योगीन्द्रानन्दः, षड्दर्शनप्रकाशनप्रतिष्ठानम्, वारणसी, 1968.

**न्यायलीलावती** शंकरमिश्रकृतकण्ठाभरण-भगीरथठक्कुरविवृतिसहितवर्धमानप्रकाशव्याख्यासहिता, सं.हरिहरशास्त्रि-ढुण्ढिराजशास्त्रिणौ, वाराणसी 1934.

**न्यायसिद्धान्तदीपः** शशधरविरचितः, सं.विमलकृष्णमतिलालः, एल् डि. इन्स्टिट्यूट् ग्रन्थमाला 56, 1976.

**प्रमाणपद्धतिः** जयतीर्थविनिर्मिता विजयीन्द्रकृतव्याख्या-वेदेशीयभावविवरण-राघवेन्द्रीयभावदीप-सत्यनाथीयाभिनवामृत-जनार्दनीयजयतीर्थविजयैः अन्येन व्याख्यात्रितयेन च सहिता सं. सवरणूरु गोविन्दः, धारवाड, 1931

**श्लोकवार्त्तिकम्** कुमारिलभट्टविरचितम्, पार्थसारथिमिश्रविरचितन्यायरत्नाकरव्याख्यासहितम्, संपा.द्वारिकादास शास्त्री, तारा पब्लिकेशन्स्, वाराणसी, 1978.